# Shri Mahaganapati Panchavarana Stotram

# શ્રી મહાગણપતિ પઞ્ચાવરણસ્તોત્રમ્

## Document Information

Text title : Shri Mahaganapati Panchavarana Stotram

File name : mahAgaNapatipanchAvaraNastotraM.itx

Category : ganesha, stotra

Location : doc_ganesha

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રી મહાગણપતિ પઞ્ચાવરણસ્તોત્રમ્

અધસ્તાન્માનુષાકારં પુરસ્તાત્કુઞ્જરાકૃતિ ।
નિરસ્તાશેષદુરિતં પુરસ્તાદસ્તુ વસ્તુ નઃ ॥

અનાદ્યાયાખિલાદ્યાય માયિને ગતમાયિને ।
અરૂપાય સ્વરૂપાય શિવાય ગુરવે નમઃ ॥

શ્રીશિવઃ -
સૃષ્ટિસ્થિતિવિનાશાનાં વિશ્વસ્યાસ્યૈકકારણમ્ ।
મહાગણપતિં વન્દે પઞ્ચાવરણસંયુતમ્ ॥ ૧॥

ક્રીડાસક્તગણાધીશ કરશીકરપૂરિતમ્ ।
ઐક્ષવામ્ભોનિધિં વન્દે તરઙ્ગકુલસઙ્કુલમ્ ॥ ૨॥

તસ્ય મધ્યે દ્વીપવર્યં નૌમિ રત્નશિલાતલમ્ ।
સેવાગતામરાધીશ દૈત્યસિદ્ધસમાકુલમ્ ॥ ૩॥

પારિજાતકસન્તાન મન્દારહરિચન્દનાન્ ।
સકલ્પવૃક્ષાન્ તત્રસ્થાન્ સંશ્રિતેષ્ટવરપ્રદાન્ ॥ ૪॥

પલાશપલ્લવફલ પ્રસૂનર્તુવરવ્રજૈઃ ।
યુગપત્સેવ્યમાનસ્ય મહતઃ કલ્પશાખિનઃ ॥ ૫॥

તેષાં જ્વલન્મરકત પ્રવાલકમણિવ્રજાત્ ।
અધસ્તાત્કૌમુદીબાલાતપાભ્યાં સઙ્કુલસ્થલીમ્ ॥ ૬॥

રત્નવેદીં યજેત્પૂર્ણકુમ્ભદીપોપશોભિતામ્ ।
લસદ્વિતાનસંયુક્તાં ચતુઃસ્તમ્ભવિરાજિતામ્ ॥ ૭॥

મુક્તાપ્રવાલશોભાઢ્યાં નાનારત્નૈશ્ચ શોભિતામ્ ।
તત્ર ધર્માદિસિંહાસ્ય ચતુષ્પાદસમન્વિતમ્ ॥ ૮॥

પૂજયામિ વિભોઃ પીઠમધર્માદ્યુપશોભિતમ્ ।

તન્મધ્યે લિપિસંયુક્તં દલાષ્ટકમનોહરમ્ ॥ ૯॥

ષટ્કોણચક્રમધ્યસ્થં ત્રિકોણાઙ્કિતકર્ણિકમ્ ।
વૃત્તભૂવલયોપેતં વિલસત્કેસરાન્વિતમ્ ॥ ૧૦॥

સર્વશક્ત્યાખ્યકમલં પૂજયામ્યાસનાત્મકમ્ ।
તીવ્રા ચ જ્વાલિની નન્દા ભોગદા કામરૂપિણી ॥ ૧૧॥

ઉગ્રા તેજોવતી સત્યા નવમી વિઘ્નનાશિની ।
કિઞ્જલ્કકર્ણિકાસીના યાસ્તાઃ શોણાઙ્ગવાસસઃ ॥ ૧૨॥

વન્દે વરાભયકરાઃ પીઠશક્તીર્ગણેશિતુઃ ।
ત્રિકોણકર્ણિકાયાં તુ સુખાસીનં સુરાર્ચિતમ્ ॥ ૧૩॥

જપાકુસુમસઙ્કાશં દીપ્તિરઞ્જિતદિઙ્મુખમ્ ।
ગજાનનં જગદ્વન્દ્યં તુન્દિલં ચન્દ્રશેખરમ્ ॥ ૧૪॥

એકદન્તં ત્રિણયનં નાગયજ્ઞોપવીતિનમ્ ।
રક્તમાલ્યામ્બરધરં રક્તગન્ધાનુલેપનમ્ ॥ ૧૫॥

ફણામણિલસદ્ભોગ ભોગિભૂષણભૂષિતમ્ ।
વામનાઙ્ઘ્રિકરામ્ભોજં દશદોર્દણ્ડમણ્ડિતમ્ ॥ ૧૬॥

રમાવિષ્ણ્વાદિમિથુન હેત્યલઙ્કૃતવિગ્રહમ્ ।
દક્ષવામકરાગ્રેષુ બીજાપૂરં ગદાં ધનુઃ ॥ ૧૭॥

ઐક્ષવં ત્રિશિખં ચક્રં કમલં પાશમુત્પલમ્ ।
કલમાગ્રં સ્વરદનં પુષ્કરે કલશં શુભમ્ ॥ ૧૮॥

દધાનં કલશસ્થાનિ નાનારત્નાનિ સર્વદા ।
વિતરન્તં સ્વભક્તેભ્યોઽભિતઃસંસૃતિધારયા ॥ ૧૯॥

ગણ્ડસ્થલગલદ્દાન ગન્ધલુબ્ધાન્મુહુર્મુહુઃ ।
નિવારયન્તં મધુપાન્ કર્ણતાલનઘટ્ટનૈઃ ॥ ૨૦॥

મહાગણપતિં વન્દે વરદં શક્તિસંયુતમ્ ।
વામાઙ્કે ગણનાથસ્ય સુખાસીનાં શુચિસ્મિતામ્ ॥ ૨૧॥

કરેણ પતિમાલિઙ્ગ્ય દક્ષિણેનેતરેણ તુ ।
બિભ્રતીં ફુલ્લકમલં કૃપાવિસ્તૃતવીક્ષણામ્ ॥ ૨૨॥

દિવ્યમાલ્યામ્બરાલેપાં દિવ્યાભરણભૂષિતામ્ ।
સાધકાભીષ્ટસર્વાર્થ સિદ્ધિદાનૈકતત્પરામ્ ॥ ૨૩॥

ગૌરાઙ્ગીં ગણનાથસ્ય શક્તિં ભક્ત્યાऽભિવાદયે ।
અગ્રે બિલ્વતરોર્મૂલે દિવ્યસિંહાસનસ્થિતૌ ॥ ૨૪॥

વિદ્યુન્નીલામ્બુદનિભૌ દ્વિચતુર્બાહુશાલિનૌ ।
પદ્મદ્વયગદાખડ્ગશઙ્ખચક્રાયુધાન્વિતૌ ॥ ૨૫॥

શ્વેતપીતામ્બરધરૌ દિવ્યાલેપનભૂષિતૌ ।
રમારમેશૌ સંસ્તૌમિ ગણેશાભિમુખસ્થિતૌ ॥ ૨૬॥

ગણેશદક્ષિણે ભાગે વટવૃક્ષસ્થલે સ્થિતૌ ।
ત્ર્યક્ષૌ સિંહાસનાસીનૌ સુરાસુરનિષેવિતૌ ॥ ૨૭॥

હાટકસ્ફટિકપ્રખ્યૌ પૃથગ્બાહુચતુષ્ટયૌ ।
પાશાङ્કુશવરાભીતિ દ્વયશૂલપરશ્વધૌ ॥ ૨૮॥

દિવ્યમાલામ્બરાલેપ ભૂષણાવિન્દુશેખરૌ ।
ગણેશાભિમુખાસીનૌ નૌમ્યુમાવૃષભધ્વજૌ ॥ ૨૯॥

ગણેશોત્તરભાગસ્થૌ બોધિવૃક્ષસ્થલે સ્થિતૌ ।
દિવ્યસિંહાસનારૂઢૌ હેમવિદ્રુમસન્નિભૌ ॥ ૩૦॥

દિવ્યમાલ્યામ્બરાલેપભૂષણૌ દ્વિદ્વિબાહુકૌ ।
ઉત્પલદ્વયપુણ્ડ્રેક્ષુ ચાપપુષ્પશરાયુધૌ ॥ ૩૧॥

ગણેશાભિમુખાસીનૌ પ્રસ્તૌમિ રતિમન્મથૌ ।
ગણેશવામ ભાગસ્થૌ પ્રિયઙ્ગુદ્રુમમૂલગૌ ॥ ૩૨॥

નીલોત્પલદ્યુતિનિભૌ દિવ્યસિંહાસનાશ્રિતૌ ।
શુકવ્રીહ્યગ્રચક્રોદ્યદ્ગદાભીતિવરાન્વિતૌ ॥ ૩૩॥

શ્વેતપીતામ્બરૌ દિવ્યમાલ્યાલેપનભૂષિતૌ ।
ગણેશાભિમુખાસીનૌ દ્વિચતુર્બાહુશાલિનૌ ॥ ૩૪॥

આધારભૂતૌ ભૂતાનાં ભૂવરાહૌ સમાશ્રયે ।
ષટ્કોણસ્થાનગામોદ પ્રમોદોન્મુખદુર્મુખાન્ ॥ ૩૫॥

અવિઘ્નં વિઘ્નકર્તારં ગણેશાભિમુખસ્થિતાન્ ।
શોણાઙ્ગાન્ શુભ્રમાલ્યાંશ્ચ ત્રિણેત્રાન્ ભોગિભૂષણાન્ ॥ ૩૬॥

પાશાઙ્કુશવરાભીતિ હસ્તાનર્ધેન્દુશેખરાન્ ।
ઋદ્ધ્યાદિશક્તિસહિતાન્ ગજવક્ત્રાન્ સમાશ્રયે ॥ ૩૭॥

ઋદ્ધિસ્સમૃદ્ધિશ્ચ તથા કાન્તિશ્ચ મદનાવતી ।
મદદ્રવા દ્રાવિણી ચ ષડામોદાદિશક્તયઃ ॥ ૩૮॥

યાસ્તાશ્ચામીકરનિભાઃ સમ્ફુલ્લામ્બુજધારિણીઃ ।
દિવ્યાભરણમાલ્યાનુલેપનાંશુકભૂષણાઃ ॥ ૩૯॥

આત્મેશાઙ્કસ્થિતાઃ સૌમ્યાઃ સિદ્ધિદાઃ શરણં ભજે ।
ગણેશોભયપાર્શ્વસ્થૌ મુક્તામાણિક્યસન્નિભૌ ॥ ૪૦॥

સદા ધનાનિ વર્ષન્તૌ સ્વશક્તિભ્યાં સમન્વિતૌ ।
વસુધારાવસુમતીભ્યાં શ્રયે શઙ્ખાખ્યપદ્મકૌ ॥ ૪૧॥

વહ્નીશરક્ષો વાય્વગ્ર પૃષ્ઠેષ્વઙ્ગાનિ ષડ્વિભોઃ ।
હૃદાદીનિ પ્રસન્નાનિ નાનાવર્ણાકૃતીનિ ચ ॥ ૪૨॥

ગણેશાભિમુખસ્થાનિ નતિમુદ્રાણિ સંશ્રયે ।
દિવ્યાંશુકાલેપમાલ્યાઃ પૃથગ્વર્ણાનનાકૃતીઃ ॥ ૪૩॥

સ્વહેતિવાહનોપેતાઃ સ્તૌમિ બ્રાહ્મ્યાદિમાતૃકાઃ ।
પ્રાગાદિદિક્પતીન્ સ્વસ્વહેતિવાહનસંયુતાન્ ।
નાનાવર્ણાકૃતીન્ સૌમ્યાનિન્દ્રાદીન્ શરણં ભજે ॥ ૪૪॥

ચતુશ્ચત્વારિંશત્પરિગણિતપદ્યૈર્વિરચિતં
ગણેશસ્તોત્રં યઃ પઠતિ નિયતાત્મા સ લભતે ।
ધનં ધાન્યં પુત્રાન્ જનનૃપવશિત્વં પશુચયં
ચિરાયુસ્સદ્વિદ્યાં વિપુલતરકીર્તિં શિવપદમ્ ॥ ૪૫॥

ચતુશ્ચત્વારિંશત્પરિગણિતમેતત્પ્રતિદિનં
જપેદષ્ટદ્રવ્યૈર્ગણપતિસમારાધનપરઃ ।
ચતુશ્ચત્વારિંશદ્દિવસમિતિ જપ્ત્વા સ લભતે
સકૃચ્છ્રાનિષ્ટાર્થાનપિ જપદિનેષ્વેવ સુલભાન્ ॥ ૪૬॥

નારિકેલકદલીફલલાજાન્મોદકાન્પૃથુકસક્તુતિલેક્ષૂન્ ।
સન્નિવેદ્ય પરિતર્પ્ય ગણેશં કીર્તયેત્સ્તવમિમં પુમર્થદમ્ ॥ ૪૭॥

યદક્ષરપદભ્રષ્ટં માત્રાહીનં તુ યદ્ભવેત્ ।
તત્સર્વં વલ્લભાયુક્તો ગણેશઃ ક્ષન્તુમર્હતિ ॥ ૪૮॥

ઇતિ શ્રીમહાશૈવતન્ત્રાન્તર્ગતં મહાગણપતિપઞ્ચાવરણસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Mahaganapati Panchavarana Stotram*
pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*